# मधुसूदनसरस्वती–कृता *गूढार्थदीपिका* : कर्म–भक्ति–ज्ञानेषु अद्वैततत्त्व–प्रकाशिका

[Madhusūdanasarasvatī-kṛtā *Gūḍhārthadīpikā* : karma-bhakti- jñāneṣu Advaitatattva-prakāśikā]

पि एड्च्. डि. गवेषणामूलकः प्रबन्धः (आर्ट्स्)

प्रबन्धसंक्षेपः


उपस्थापकः

फणिशंकर–मण्डलः

तत्त्वावधायिका

ड. काकली घोष

अध्यापिका, संस्कृत–विभागः, यादवपुर–विश्वविद्यालयः



२०२१

# सूचिपत्रम्


| परिच्छेदनामानि | पृष्ठाङ्कः |
| --- | --- |
| प्रथमोऽध्यायः– *गूढार्थदीपिका*याः परिचयसामान्यम् | ३–४ |
| द्वितीयोऽध्यायः– ग्रन्थकार–परिचयः | ५–७ |
| तृतीयोऽध्यायः– *गूढार्थदीपिका*यां कर्मयोगतत्त्वम् | ०८–१२ |
| चतुर्थोऽध्यायः– *गूढार्थदीपिका*यां भक्तियोगतत्त्वम् | १३–१७ |
| पञ्चमोऽध्यायः– *गूढार्थदीपिका*यां ज्ञानयोगतत्त्वम् | १८–२० |
| षष्ठोऽध्यायः– उपसंहृतिः | २१ |
| ग्रन्थानां पञ्जिः | २४ |

# प्रथमोऽध्यायः

## *गूढार्थदीपिका*याः परिचयसामान्यम्

### उपोद्घातः

*श्रीमद्भगवद्गीता*या गुणगौरवं कस्य विपश्चितो न विदितम्। *महाभारत*स्य भीष्मपर्वान्तर्गतस्य *श्रीमद्भगवद्गीते*यं न हि केवलं सर्वासामेवोपनिषदामपि तु समग्रस्यापि पूर्ववर्तिनो वाङ्मयस्य सारभागमुपस्थापयति । अत एवोक्तं यथार्थतया–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।

पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥[1] इति।

उपनिषत्सु ये एव भावाः केवलं निगूढशैल्या दार्शनिकपद्धत्या च समभिहिताः सन्ति गीतायामस्यां त एव भावा भावप्रकाशनशैल्या साधिष्ठया समासतश्च प्रस्तूयन्ते।

### *गूढार्थदीपिका*–टीकायाः परिचयसामान्यम्

*श्रीमद्भगवद्गीता*माश्रित्य विभिन्नसंप्रदायेषु विविधाः टीकाः समभवन्। तत्राद्वैतवेदान्ति–श्रीमन्मधुसूदनसरस्वतीपाद–कृता *गूढार्थदीपिका*–नामधेया टीका अग्रगण्या एव। *गूढार्थदीपिका*यां प्रतिपदं भक्तिरसमाधुर्यं प्रेक्ष्य प्रेक्षावन्तोऽस्य प्रशंसन्ति। न हि केवलं भक्तितत्त्वमपि च ज्ञानकर्मयोगयोः सम्यगालोचनम् अत्राद्वैतवेदान्तदर्शनालोकेन प्रतिपादितम्। श्रीभगवतः ऐश्वर्यमहिम्नि आचार्यपादस्य समधिकी श्रद्धा आसीत्। दिङ्मात्रमुदाहरणमत्र प्रस्तूयते। तत्र–

सर्वधर्मान् परित्यज्य... मा शुचः॥ (श्री. म. गी.– १८/६६)

इति श्लोकव्याख्याने अनन्तं परमानन्दघनमूर्तिं श्रीवासुदेवमेव भजस्व इत्युक्त्वा भगवच्छरणागतेः भेदत्रयव्याख्याने आचार्यपादेन यदुक्तं तेन रसिकभक्तस्य द्रवीभूतचित्तं परमानन्देनाप्लुतम्–

तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा।
भगवच्छरणत्वं स्यात् साधनाभ्यासपाकतः॥[2] इति।

एवमद्वैतवेदान्तमतानुसारिण आचार्यपादस्य रचनायां वेदान्तप्रतिपाद्यसिद्धान्तनिचयेन सह भक्तिमार्गस्यानुकूलव्याख्यानानि उपलभ्यन्ते। *गूढार्थदीपिका*याम् एवमन्यानि बहूनि उदाहरणानि द्रष्टव्यानि।

# द्वितीयोऽध्यायः

# ग्रन्थकार–परिचयः

## उपोद्घातः

रत्नप्रसविनीयं मातृभूमिः। अस्यां बहवः कृतिनो जन्म लब्ध्वा जन्मभूमिं गौरवेण समलङ्कृतवन्तः। तेषां भारतीयमनीषिणां मूर्धन्यरूपः स्वनामधन्यः श्रीमन्मधुसूदनसरस्वतीपादः अद्वैतवेदान्तदर्शनस्य सुयोग्यतमः सारथिरासीत्। वङ्गजनन्या वरपुत्रस्य मधुसूदनसरस्वतीपादस्य नाम अस्मिन् वेदान्तपरिमण्डले को वा न जानाति। तत्कृतिषु भक्तिरसधारया आत्मानं परिषिच्य गङ्गा–यमुना–सरस्वतीनाम् ऊर्मिप्रवाह इव निरन्तरं विशालानन्दं को वा नानुभवति।

## ग्रन्थकारस्य परिचयसामान्यम्

श्रीमन्मधुसूदनसरस्वती १५२५ ईशवीयेऽधुना वङ्गदेशस्य फरिदपुरजिलायाः कोटालिपाडापरगणान्तर्गतमुनशियानामकं स्थानं स्वजनुषा अलंचकार। काव्यालङ्कारन्यायशास्त्रादौ बालकस्य प्रतिभा चतसृषु दिक्षु प्रसारितोऽभवत्। भगवत्प्रसादस्य अत्युत्कृष्टत्वं ज्ञात्वा श्रीधामनवद्वीपे श्रीगौराङ्गमहाप्रभोः पादपद्मे शरणलाभार्थं संन्यासग्रहणे स कृतसंकल्पो बभूव। समायाते च नवद्वीपे महाप्रभुः नीलाचले चिराय प्रस्थितमिति संवादं श्रुत्वा शास्त्रोपलब्धिद्वारेण मोहमुक्तिः संभवतीति विचार्य अध्यात्मशास्त्रपाठनिरतोऽसौ जातः। न्यायचर्चाकेन्द्ररूपेण तदा नवद्वीपधामस्य प्रसिद्धिरासीत्। अत्रैव स्थित्वा प्रथमे एव न्यायशास्त्रचर्चायां बुद्धिं दृढीमहे इति विचारयामास मधुसूदनः। न्यायशास्त्रानुशीलनरतोऽपि नवद्वीपस्य भक्तसाधकवर्गमध्येऽवस्थानकाले बालकस्य हृदयं भक्तिरसेनाप्लुतम्। महाप्रभोः प्रचारिततत्त्वेन रसमधुरलीलया अपि आलोडितं तस्य हृदयम्।

माधुर्यसमन्वितद्वैतवादस्य प्रचारो महाप्रभुना क्रियते। नव्यन्यायाध्ययनेन द्वैतवादे मधुसूदनस्य मतिः स्थिरा जाता। स्वप्रतिभया विद्याबलेन च एकेन महाग्रन्थेन महाप्रभुसंमतदार्शनिकमतानां श्रेष्ठत्वं स्थापयिष्याम इति मनसि अचिन्त्ययत् सः। एतत्कार्यस्यान्तरायः शंकराचार्यसंमतोऽद्वैतवाद एव। अद्वैतमतस्य पूर्णाधिगतार्थं तथा चाद्वैतशास्त्रस्य कुत्र शैथिल्यमस्तीति ज्ञानार्जनार्थं स वेदान्तचर्चाकेन्द्रे वाराणसीधामे संप्राप्तः। वेदान्तकेशरी रामतीर्थाचार्यसविधे स वेदान्तशास्त्राभ्यासं चकार। तत्समक्षेऽद्वैतज्ञानरहस्यम् उद्घाटितम्, भक्तिवादस्य स्वरूपमपि नवरूपेण प्रकाशितम्। पूर्णाभेदज्ञानेन पूर्णभक्तिः निहिता, नान्यत्र। श्रुतिरूपप्रामाण्यशास्त्रबलेनैव केवलम् अद्वैतब्रह्मणः परमतत्त्वं ज्ञायत इति हि साधकमधुसूदनस्याभिमतम्। अद्वैतसिद्धान्तस्य यौक्तिकत्वविषये तन्मनसि नासीत् कोऽपि संशीतिलेशः। भ्रान्तबुद्ध्या अद्वैतमतखण्डनार्थं स प्रयत्नं चकार। इदं कपटाचरणरूपपापस्खलनार्थं स गुरुचरणे समुपस्थितोऽभवत्। श्रुत्वा च वृत्तान्तजातं रामतीर्थाचार्यस्तं मण्डलेश्वरविश्वेश्वरसरस्वतीसकाशे संन्यासग्रहणार्थमुपादिदेश। समुपस्थिते च विश्वेश्वराचार्याश्रमे आचार्यवरस्तमुवाच केवलं पाण्डित्येन संन्यासस्य योग्यता नोत्पद्यते, वैराग्यस्य तथा भगवद्भक्तेरपि प्रयोजनमस्ति। मधुसूदनस्य संन्यासग्रहणेच्छा सुदृढा उत वा आवेगसंजातेति विचारयितुं *श्रीमद्भगवद्गीताया* भक्तिमूलानुगा एका टीका रचनार्थं तमादिदेश। गुरोरादेशेन स गीतायाः *गूढार्थदीपिका*–नामधेया एका टीका विरचयामास। अस्यां टीकायां प्रतिपदं तत्त्वज्ञानेन सह भक्तिरसस्यामृतवर्षीमेलनधारया विश्वेश्वराचार्यो विस्मयविमुग्धतामुपगतः। बहुदिवससाध्यपरिश्रमेण विद्यावत्तया एकनिष्ठशास्त्रसाधनया च स पुनः *अद्वैतसिद्धि*रिति महाग्रन्थो रचयामास। माध्वसंप्रदायाचार्येण व्यासतीर्थेण *न्यायामृत*ग्रन्थे अद्वैतमतखण्डनार्थं या युक्तिनिचयस्यावतारणा कृता *अद्वैतसिद्धि*ग्रन्थे मधुसूदनेन पङ्क्तिव्यावृत्तिपूर्वकं पूर्वपक्षीय–मतखण्डनपुरःसरं सुयुक्तिद्वारेण अद्वैतमतस्थापनं कृतम्। ग्रन्थस्यास्य प्रकाशनाद् अद्वैतवादस्य विजयो विस्तारं लेभे।

श्रीकृष्णतत्त्वभिन्नपरमतत्त्वमस्ति न वेति मधुसूदनेन न ज्ञायते। वचनमिदम् अद्वैतमतविरोधी इति वक्तुं न शक्यते। या साकारकृष्णोपासना अत्राभिधीयते तत्तूपासनायां परमतत्त्वम्। उपास्यतत्त्वेषु श्रीहरेः श्रेष्ठत्वं परं भगवतः ज्ञेयत्वमवश्यमेव निर्गुणं निर्विशेषं च। अतः श्रीकृष्णतत्त्वेन अद्वैततत्त्वं न खण्डितमिति स्पष्टम्। शास्त्रोपदेशादिबहिरङ्गकार्यानुष्ठानाद् आत्मानं प्रत्याहृत्य भारतप्रसिद्धोऽयं भावुकः १६३२ ईशवीये सप्तोत्तरशतवर्षे वयसि पुण्यलग्ने हरिद्वारतीर्थस्य गङ्गातीरे महासमाधौ निमग्नोऽभवत्।

# तृतीयोऽध्यायः

## *गूढार्थदीपिकायां* कर्मयोगतत्त्वम्

### उपोद्घातः

समस्तवेदार्थसारसंग्रहभूतं गीताशास्त्रम्। अष्टादशाध्यायसमाप्तेर्गीतायाः योगप्राधान्यं स्पष्टतया अवज्ञायते। योग–शब्दस्य बहवोऽर्था भवितुमर्हन्ति। युज्–धातोरूत्तरं घञ्–प्रत्ययनिष्पन्नेन योग–शब्देन परमात्मना सह जीवात्मनः संयोगो मेलनं वा बोध्यव्यम्। उक्तं च पाणिनीयधातुपाठे– युजिर् योगे[3] इति। पुनश्च 'युज समाधौ'[4] इत्यनुसारेण योग–शब्दस्यार्थः समाधिरिति। प्रमाणादि–चित्तवृत्तीनां निरोधार्थेऽपि योगशब्दः प्रयुज्यते। महर्षिपतञ्जलिना सूत्रितम्– 'योगश्चित्तवृत्तिनिरोधः' [5] । *श्रीमद्भगवद्गीता*यामपि सिद्ध्यसिद्ध्योः समत्वरूपं चित्तसमाधानमेव योग इत्यभिधीयते–

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ (श्री. म. गी. २/४८)

इममेवार्थमधिकं स्पष्टीकर्तुं भगवान् अग्रे प्रावोचत्–

तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्॥ (श्री. म. गी. २/५०)

क्रियमाणेषु कर्मसु बुद्धियोग एव कौशलम्। निष्कामकर्मयोगस्यैव वाचकोऽस्त्ययं योगः।

### पूर्वपक्षिणोऽभिमतम्–

*गूढार्थदीपिका*यां कर्मयोगतत्त्वालोचनप्रसङ्गे ज्ञानकर्मणोः समुच्चयोऽस्ति न वेति विषये पूर्वपक्षिण आशयोऽत्र विचार्यः। अत्रोल्लेख्यम्, ज्ञानकर्मणोः समुच्चयः पूर्वपक्षिभिः स्वीक्रियते। तत्र विशिष्टाद्वैतवादिना श्रीमद्रामानुजाचार्यमतेन कर्मयोगस्य ज्ञानाकारताप्रकारं प्रतिपादनार्थं

तथाविधकर्मयोगाधिकारिणो दुर्लभत्वमुक्तमेव। न हि केवलं मोक्षसाधनभूतस्य कर्मणः स्वरूपे प्रत्युत नित्यनैमित्तिकविविधकाम्यकर्मरूपविकर्मणः स्वरूपे, अकर्मणि च ज्ञाने बोद्धव्यमस्ति। अतो मुमुक्षोः कर्मणो गतिः गहना दुर्विज्ञाना एव। क्रियमाणकर्मणि ज्ञानाकारम् आत्मस्वरूपानुसंधानम् अन्तर्भूतत्वाज् ज्ञानं कर्मणि अन्तर्गततया च कर्माकारं यः पश्येत् स बुद्धिमान् कृत्स्नशास्त्रार्थविदेव। श्रीमद्रामानुजकृते गीताभाष्ये उच्यते– कर्मणि क्रियमाणे एव आत्मज्ञानं यः पश्येद् अकर्मणि च आत्मज्ञाने वर्तमान एव यः कर्म पश्येत्। किमुक्तं भवति? क्रियमाणम् एव कर्म आत्मयाथात्म्यानुसंधानेन तदुभयं संपन्नं भवति[6] इति।

पुनश्च, अङ्गसहितस्य सर्वकर्मणः परब्रह्मभूतपरमपुरुषात्मकत्वानुसंधानयुक्ततया ज्ञानाकारत्वमपि कथितमेव। यज्ञादौ य आहुतिः अर्प्यते तत्सर्वं ब्रह्मस्वरूपम्। यज्ञपदमत्र सर्वकर्मणः उपलक्षणम्। यश्च ब्रह्मात्मकत्वात् सर्वं कर्म ब्रह्ममयमिति समाधत्ते स ब्रह्मकर्मसमाधिः। ब्रह्मकर्मसमाधिपुरुषस्य गन्तव्यं एव ब्रह्म। ब्रह्मात्मकतया ब्रह्मभूतम् आत्मस्वरूपमपि तस्य गन्तव्यमिति प्रतीयते। अतो मुमुक्षोः क्रियमाणं सर्वं कर्म परब्रह्मात्मकत्वाज् ज्ञानाकारमित्यनेन ज्ञानकर्मणोः समुच्चयोऽपि प्रतिपादित इति हि पूर्वपक्षिणोऽभिमतम्।

## *गूढार्थदीपिका*यां कर्मयोगतत्त्वम्–

ज्ञानकर्मयोगयोरात्यन्तिकविरोधात्तयोः समन्वयाभावादप्यद्वैतज्ञानप्राप्त्यर्थं कर्मयोगस्यारादुपकारकत्वं *गूढार्थदीपिका*यां स्पष्टीक्रियते। कर्म–पदेनात्र काम्यनिषिद्धकर्मणी परित्यज्य निष्कामकर्मानुष्ठानं बोध्यव्यम्। तत्रापि श्रीहरेर्जपस्तुत्यादिकं परमधर्मत्वेन स्थिरीक्रियते *गूढार्थदीपिका*कारेण–

निष्कामकर्मानुष्ठानं त्यागात् काम्यनिषिद्धयोः।
तत्रापि परमो धर्मो जपस्तुत्यादिकं हरेः॥[7] इति।

भगवदर्पणबुद्ध्या कृतानि फलाभिसंधिरहितशास्त्रीयकर्माणि योगा इति ह्याचार्येण–

एकं सांख्यं च योगं च यः पश्यति स पश्यति॥ (श्री. म. गी. ५/५)

इति श्लोकव्याख्यायां निरूपितम्– योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्रीयाणि योगास्ते येषां सन्ति तेऽपि योगा[8] इति।

समरभूमौ पुरतः पितृनाचार्यान् सबान्धवान् च दृष्ट्वा कौन्तेयः परमं खेदमापन्नः। भगवान् वासुदेवः युद्धादुपरतमर्जुनं युद्धाभिमुखीकर्तुकामः ज्ञानयोगं कर्मयोगं चाश्रित्य तं प्रतिबोधितवान्। ज्ञानसंपादनार्थं प्रथमावस्थायां कर्मणामवश्यकर्तव्यता प्रतीयते। क्षत्रियस्य युद्धं हि प्रशस्तो धर्मः। तेन हिंसादिमत्वेऽपि युद्धस्य स्वधर्मत्वेनाधर्मत्वाभावं प्रतिपादयता श्रीभगवद्वचनं मन्वादिस्मृतिवचनेन समर्थितं *गूढार्थदीपिका*कारेण– युद्धमेव हि पृथिवीजयद्वारेण प्रजारक्षणब्राह्मणशुश्रूषादिक्षात्रधर्म–निर्वाहकमिति तदेव क्षत्रियस्य प्रशस्ततरमित्यभिप्रायः।... शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परम्' (७/८७,८८) इत्यादिना।[9]

अन्तःकरणशुद्ध्यर्थमेवार्जुनं प्रति कर्मयोग उपदिश्यते श्रीभगवता। केवलं कर्तव्यबुद्ध्या लाभालाभादिविचारनिरपेक्षया निष्कामकर्म एव कर्मयोगेन बोध्यव्यः। *आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः* (बृ. उ. २/४/५) इति श्रुतिवचनेन आत्मज्ञानार्थं श्रवणादीनामुपयोगो वर्णितोऽस्ति। तत्र श्रवणेन चित्तगतशुद्धिर्न संपद्यते, तत्तु निष्कामकर्मानुष्ठानेनैव संभवेत्। अतोऽशुद्धान्तःकरणं प्रति कर्मोपदेशत्वाज् ज्ञानकर्मयोगयोः समुच्चयाशङ्कापि निराकृता।

एवं द्वितीयाध्याये कर्मयोगं प्रस्तुत्य कर्मैव कर्तव्यत्वेनोपदिष्टम्। तदनन्तरं तृतीयाध्याये निष्कामकर्मनिष्ठया अन्तःकरणशुद्धिस्तदनन्तरं शमादिषट्कसंपत्त्या सर्वकर्मसंन्यासात् परं 'तत्त्वमस्या'दि–वेदान्तमहावाक्यविचारपुरःसरं भगवद्भक्तिनिष्ठा ततस्तत्त्वज्ञाननिष्ठा भवेदिति भूयो भूयः प्रतिपादितम्।

*श्रीमद्भगवद्गीता*याः चतुर्थेऽध्याये ज्ञानयोगोपायस्वरूपः कर्मयोगः प्रपञ्चितः। तत्रादौ कर्माकर्मणोर्भेदं निरूप्य यज्ञार्थं तपःकरणं तस्य च फलं ब्रह्मार्पणं प्रशस्य श्रीभगवता पार्थं प्रत्युपदिष्टम्–

कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्। (श्री. म. गी. ४/१५)

यज्ञस्वरूपस्य विशालकल्पना अध्यायेऽस्मिन् परिलक्ष्यते। बहुविधा यज्ञा भगवतोऽभिमताः। न केवलं वाजपेयादयो महायज्ञा अनुष्ठेयाः किं तु तपोयज्ञ–योगयज्ञ–ज्ञानयज्ञ–स्वाध्याय–यज्ञादयोऽप्याचरितव्या मुमुक्षुभिः। यज्ञस्वरूपं वर्णयता सम्यक्तयोक्तमाचार्येण– यज्ञाय यज्ञसंरक्षणार्थं ज्योतिष्टोमादियज्ञे श्रेष्ठाचारत्वेन लोकप्रवृत्त्यर्थं, यज्ञाय विष्णवे तत्प्रीत्यर्थमिति वा...[10] इति। बन्धनकारकत्वाद् यज्ञादन्यत् कर्म त्याज्यम्। ज्ञानयज्ञो द्रव्ययज्ञात् श्रेयान्। यज्ञादिरूपोऽखिलश्रौतस्मार्तकर्मजातं ज्ञाने पर्यवस्यतीति श्रीभगवता प्रोक्तम्– सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते। (श्री. म. गी. ४/३३)

गीतायाः पञ्चमेऽध्याये कर्मसंन्यासस्य लक्षणान्यल्पत्वेनोदाह्रियन्ते। तत्र तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते। (श्री. म. गी. ५/२) इति प्रस्तुत्याग्रिमभागनिरूपणं कर्मयोगपरत्वेनापेक्ष्यते। कर्माधिकारहेतुभेदबुद्ध्यपनोदकत्वाज् ज्ञानेन सह कर्मणः तमःप्रकाशवद् विरोधित्वमस्ति। ज्ञानप्राप्त्यर्थमादौ भगवदर्पणबुद्ध्या निष्कामकर्म–संपादन–पूर्वकमन्तःकरणशुद्धौ सुतीव्रवैराग्येन विविदिषोत्पत्तौ सर्वकर्मसंन्यासः श्रवणादिना वेदान्तवाक्यविचारः कर्तव्य इति हि भगवन्मतम्। कर्मणामनारम्भान्नैष्कर्म्यं न लभते। योगारूढत्वस्य कर्म एव कारणमुच्यते। तीव्रवैराग्यपूर्विका विविदिषा अत्र योगशब्देन ज्ञायते।

कर्मफलस्य परित्यज्यत्वेऽपि कर्मणः हीनत्वाशङ्का कदापि नावमन्तव्येति गीतायाः षष्ठाध्याये विशदीक्रियते। फलाभिसंधिवर्जिताग्निहोत्रादिनित्यकर्मकर्तारं संन्यासी योगी वेति कथ्यते। अत्र संन्यासपदेन त्यागो योगपदेन च चित्तगत–विक्षेपाभावः ज्ञेयः। संन्यास–योग–शब्दाभ्यां

कर्मफलाकाङ्क्षात्यागोऽत्राभिधीयते। संकल्पत्यागः कामनाराहित्यं चोभयस्य मूलीभूततत्त्वम्। बाह्यकर्मत्यागपूर्वकस्य कामनासंयुक्तान्तरात्मासंपन्नस्य संन्यासिनो योगीपदसंज्ञा न सिध्यति।

श्रीकृष्णतत्त्वरूप–परमतत्त्वस्य यथार्थज्ञानं यद्यपि भक्त्या एव संभवति परं भक्तिभूमेः दृढीकरणे कर्मयोगस्य महदुपयोगित्वात् तस्यारादुपकारकत्वमस्तीति निश्चप्रचम्। अद्वैतज्ञानप्राप्तये कर्मयोगस्योपयोगित्वं प्रथमषट्के सूक्ष्मविचारधारया साकं श्रीमन्मधुसूदनेन केन प्रकारेणैव प्रतिपादितं तदेव संक्षेपतया अत्र आलोचितम्।

# चतुर्थोऽध्यायः

## *गूढार्थदीपिका*यां भक्तियोगतत्त्वम्

### उपोद्घातः

*गूढार्थदीपिका*यां भक्तियोगस्याद्वैततत्त्वप्रकाशविषये आलोचनप्रसङ्गे भक्त्या रसत्वं तथा अलौकिकत्वमपि विचारपदवीमपेक्ष्यते। अस्यामेवालोचनायां मधुसूदनसरस्वतीपादकृत–*भक्तिरसायना*दि–भक्तिशास्त्राणां प्रसङ्गसामान्यं *गूढार्थदीपिका*यामुल्लिखितत्वात्तेषामेव ग्रन्थानामपि पर्यालोचनं कर्तव्यम्।

### केयं भक्तिर्नाम?

*गूढार्थदीपिका*यां प्रस्फुटितभक्तिरस–पर्यालोचनारम्भे प्रथमे एव मनसि पदं करोति केयं भक्तिर्नामेति। उपनिषद्येव भक्तिशब्दस्योल्लेखः प्रथमतया प्राप्यते–

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। (श्वे. उ. ६/२३) इति।

सेवार्थकभज्–धातोर्भक्तिशब्दो निष्पन्नः। अस्य चार्थो भगवतः सेवनम्। इयं खलु परमप्रेमरूपेति नारदः प्राह– 'सा तस्मिन् परमप्रेमरूपा'[11] इति। तत्र प्रेमस्वरूपं किमित्युक्ये तेनाभिहितम्– 'अनिर्वचनीयं प्रेमस्वरूपम्'[12] इति। ईश्वरविषयिणी परानुरक्तिरेव भक्तिरिति हि महर्षि–शाण्डिल्यस्याभिमतम्– 'सा परानुरक्तिरीश्वरे'[13] इति। *परमसंहिता*वप्युच्यते, स्नेहपूर्वकं भगवत अनुध्यानमेव भक्तिः– स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते[14] इति। *श्रीमद्भागवते* विहिताविहिताभ्यां वा उभयाभ्यां श्रीहरौ चित्तसंयोजनं भक्तिरित्युक्तम्– केनाप्युपायेन मनः कृष्णे निवेशयेत्[15] इति।

श्रीमच्छंकराचार्येण जीवात्मनि परमात्मनः अनुसंधानं यद्वा जीवस्य स्वरूपोपलब्धेः प्रयास एव भक्तिरित्यभिहितम्–

स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते।

स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः॥ (वि. चू. ३२) इति।

श्रीरामानुजाचार्यमतेन ध्रुवानुस्मृतिरेव भक्तिः– ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते [16] इति। *पञ्चरात्रपरमसंहिता*यां स्नेहपूर्वकमविरतध्यानमेव भक्तिरिति निरूपितम्। श्रीरूपगोस्वामि–कृत–*भक्तिरसामृतसिन्धौ* सर्वकामनापरित्याग–पूर्वकेन श्रीहरेः प्रीतिविधाननिमित्तानुष्ठितक्रियाया भक्तिपदवाच्यत्वं निर्धारितमेव। श्रीमन्मधुसूदनसरस्वतीपाद–मतेन भगवद्गुणनाम–महिमादि–श्रवणात् द्रवीभूतचेतसः परमेश्वरे या प्रत्ययान्तरानन्तरिता समानाकारा वृत्तिः सा भक्तिरित्युच्यते।

## भक्त्या रसत्वनिरूपणम्

साहित्यसाधनयोर्मध्ये भेदभावो नाङ्गीक्रियते वैष्णवाचार्यैः। साहित्यसाधनया सह भगवत्साधनाया एकात्मकत्वं तैरभिप्रेतम्। शृङ्गारकरुणादिरसैः पाठकहृदये अलौकिकाह्लादं समुपजायते। केवलं भक्त्या एतादृशोन्नतावस्थायां समुन्नीताभावात्तस्या भावमात्रमेव स्वीकार्यं न तु रसत्वमिति हि मम्मटाचार्य–विश्वनाथाद्युत्तरध्वनिकालीन–साहित्यमीमांसकानामभिमतम्। भक्तिरसविरुद्धालंकारि–कानां मतखण्डनपुरःसरं भक्त्या रसत्वमुत्कर्षत्वं च प्रतिष्ठितं मधुसूदनसरस्वतीपादेन।

आस्वाद्यत्वाद्रसेति सार्थकनामधेयं वर्तते। *नाट्यशास्त्रे* भरतमुनिना निर्दिश्यते– रस इति कः पदार्थः? उच्यते– आस्वाद्यमानत्वात्[17] इति। रसरूप–श्रीभगवत आनन्दमयी सत्ता भक्तजनैः कथं नास्वाद्यते? आनन्दसंमिश्र–भगवत्प्रीत्या आस्वादः एव भक्तिरसः। चित्तस्य विषयाकारता स्थायिभाव–रूपेणाभिधीयते। चित्तस्य विषयाकारतारूप–स्थायिभावः परमा–नन्दरूपेण स्फुटतरः सन्

विभावादिभिरास्वादन–योग्यतामापन्नः रसनामको भवति। भक्तेरपि रसत्वनिरूपणार्थं स्थायिभावो निरूपणीयः। स्थायिभावस्य रसत्वोपपत्तये परमानन्दरूपतामुपपादयता श्रीमन्मधुसूदनेनाकुतम्–

भगवान् परमानन्दस्वरूपः स्वयमेव हि।
मनोगतस्तदाकाररसतामेति पुष्कलम्॥ (भ. र. १/१०) इति।

परमानन्दश्च भगवान् मनसि प्रतिबिम्बितः स्थायिभावतामासाद्य रसतामापादयतीत्युक्त्वा भक्तिरसस्य परमानन्दरूपत्वमपि निरूपितमेव।

## भक्तिरसस्यालौकिकत्वनिरूपणम्

स्थायिभावस्यापार्थिवत्वे रसस्याप्यलौकिकत्वं विज्ञेयम्। तेनाप्राकृत–भक्तिरसस्य स्थायिभावो भगवद्रतेरप्राकृतत्वालौकिकत्व–विषये च नास्ति संशीतिलेशः। अप्राकृतत्वमिदं भक्तिभावस्यानन्य–वैशिष्ट्यम्। एतस्माद् हेतोः भक्तिरसस्य दिव्यरस इति नामान्तरमपि विद्यते। प्रत्युत वैष्णवरसशास्त्रे भक्तिरसस्यालौकिकत्वं भक्तिरसेन सहेतर–शृङ्गारादि–रसानां प्रभेदादनुमीयते।

आश्रयभेदवशाद् लौकिकप्रीत्या भगवत्प्रीतिः विलक्षणमित्यवधारणीयम्। पार्थिवविषयत्वाल्लौकिक–प्रीतिः बहिःसंचारिणी, चञ्चलस्वभावा। परं भागवतीप्रीत्या आश्रयालम्बनस्यान्तर्लोक–विहारित्वात् कालातीतत्वाच्च तस्यान्तर्मुखित्वं स्थिरत्वमचञ्चलस्वभावत्वं च विज्ञेयम्। इयं भगवदाकारतारूपान्तरवृत्तिः भक्तिरसे परिणमते।

द्रुते चित्ते प्रविष्टवस्त्वाकार–प्रकृत्यनुसारेण स्थायिभावस्य लौकिकत्वम् अलौकिकत्वमपि ज्ञेयम्। विषयस्य लौकिकत्वे स्थायिभावस्य लौकिकत्वम् अलौकिकत्वेऽपि तस्यालौकिकत्वम्। भक्तचित्ते परमानन्दघन–श्रीभगवद्रूपस्थायिभावस्य प्रतिबिम्बितत्वाद् भक्तिरसस्य लोकोत्तरत्वं निर्विवादम्। अतो भक्तिरसस्यालौकिकत्वं श्रीमन्मधुसूदनसरस्वतीपादेन सुयुक्तिद्वारेण व्यवस्थापितमिति निश्चप्रचम्।

## *गूढार्थदीपिको*क्ता भक्तिः

*श्रीमद्भगवद्गीताया*ः मध्यमषट्के भगवद्भक्तिनिष्ठा–वर्णनोपायेन परमानन्द–भगवत्स्वरूप–भूतस्तत्पदार्थोऽवधारितः। अत्र परमानन्द–स्वरूपस्तत्पदार्थभुता भगवद्भक्तिनिष्ठा केन प्रकारेणैव विधृता कतिचिदुदाहरण–सहयोगेन आलोच्यते। तत्र–

दैवी ह्येषा गुणमयी मम माया दुरत्यया। (श्री. म. गी. ७/१४)

इति श्लोके 'प्रपश्यन्ति'स्थले 'प्रपद्यन्ते'पदं कथं प्रयुक्तं तस्य व्याख्यायां भगवन्माहात्म्य–प्रतिपादक–विविधविशेषणानि प्रयुक्तानि। उक्तं च– प्रपश्यन्तीति वक्तव्ये प्रपद्यन्त इत्युक्तेः ये मदेकशरणाः सन्तो मामेव भगवन्तं वासुदेवमीदृशमनन्त–सौन्दर्यसार–सर्वस्वमखिल–कला–कलापनिलयम्... ते मत्प्रेम–महानन्द–समुद्रमग्नमनस्तया समस्तमायागुण–विकारैर्नाभिभूयन्ते;[18] इति।

पुनश्च–

नाहं प्रकाशः सर्वस्य योगमायासमावृतः। (श्री. म. गी. ७/२५)

इति श्लोक–व्याख्यानावसरे श्रीभगवति अविवेकिनो मनुष्यबुद्धिः कथं जायन्त इत्याशङ्क्यते। श्रीहरिः कीदृशस्तस्य विशेषणान्यत्र उल्लिखितानि– ननु जन्मकालेऽपि सर्वयोगिध्येयं श्रीवैकुण्ठ–स्थमैश्वरमेव रूपमाविर्भावितवति संप्रति च श्रीवत्सकौस्तुभ–वनमाला–किरीटकुण्डलादि–दिव्योपकरणशालिनि... त्वयि कथमविवेकिनोऽपि मनुष्यबुद्धि–र्जीवबुद्धिर्वेत्यर्जुनाशङ्कामपनिनीषुराह भगवान् नाहम्[19] इति।

इदमत्र आपतति, श्रीचरणारविन्द–दर्शकसकाशात् सौन्दर्यसारसर्वस्व–वासुदेवस्य एतादृशवर्णनम् उपपन्नमेव।

अत्रोल्लेख्यम्, द्वैतवादे आधारितो भक्तिवादः। भक्तो भगवांश्चेति द्वयमन्तरेण प्रीतिरूपा भक्तिर्नाङ्गीक्रियते। भक्तिवादस्याङ्गीकारेऽपि अद्वैतवेदान्तस्वीकृत–सिद्धान्तनिचयो न परित्यक्तः। भक्तिवर्जित–शुष्कविचारात्मकं ज्ञानं न वेदान्त–प्रतिपाद्य–ज्ञानमिति ह्याचार्यपादाभिमतम्। तमःप्रकाशवद् भक्तिज्ञानयोर्विरोधित्वं न स्वीकृतम्, परं द्वयोर्मध्ये समन्वयसंबन्धो घनिष्ठसंबन्धो वा अस्तीति आचार्येण प्रतिपादितम्। प्रसङ्गेऽस्मिन् भक्तिमार्गस्याभ्युदयस्तथा क्रमधारापि विचारपदवीमपेक्ष्यते; सर्वमेतत् मूलपत्रे आलोच्यते।

# पञ्चमोऽध्यायः

# *गूढार्थदीपिका*यां ज्ञानयोगतत्त्वम्

## उपोद्घातः

अष्टादशाध्यायसमन्वितायाः *श्रीमद्भगवद्गीता*याः तृतीयषट्के ज्ञानकर्मणोः समन्वयाभावात् ज्ञाननिष्ठातत्त्वं विधृतम्।

पृथक्–पृथक्–षट्के कर्म–भक्ति–ज्ञानतत्त्वानि विधृतेऽपि तेषां घनिष्ठसंबन्धाः सन्ति। यतः प्रथमषट्के कर्म तत्त्यागवर्त्मना च विशुद्धात्मा त्वंपदार्थः, द्वितीयषट्के भगवद्भक्तिनिष्ठा–वर्णनवर्त्मना परमानन्द–स्वरूपस्तत्पदार्थः, तृतीयषट्के च तत्–त्वं–पदार्थयोः एकत्वं वर्ण्यते। ज्ञानयोगपरं तृतीयषट्कमवलम्ब्य एवात्र पर्यालोच्यते।

## *गूढार्थदीपिका*यां ज्ञानयोगतत्त्वम्

प्रथमषट्कद्वये तत्त्वं–पदार्थयोः अर्थनिर्धारणात् परं तृतीयषट्के परमात्मना सह जीवस्याभेदरूप–तत्त्वज्ञानं प्रारभ्यते। परमात्म–जीवात्मनोः भेदभ्रमं सर्वानर्थकारणमिति टीकाकारेण प्रोक्तम्– प्रथम–मध्यम–षट्कयोस्तत्त्वं पदार्थावुक्तावुत्तरस्तु षट्को वाक्यार्थनिष्ठः सम्यग्धी–प्रधानोऽधुना आरभ्यते। ...तच्चाद्वितीयेन परमात्मना सह जीवस्याभेदमेव विषयीकरोति, तद्भेद–भ्रमहेतुकत्वात् सर्वानर्थस्य[20] इति। इन्द्रियान्तःकरण–सहितम् अस्मदादीनां भोगायतनं शरीरं क्षेत्रमित्यभिधीयते। एतद् यो वेत्ति अहं ममेत्यभिमन्यते तं क्षेत्रज्ञ इति प्राहुः। स्वप्रकाश–चैतन्यरूपं क्षेत्रज्ञम् अविद्याध्यारोपित–कर्तृत्व–भोक्तृत्वादि–संसारधर्ममाविद्यकरूप–परित्यागेन च ईश्वरमसंसारिणमद्वितीय–ब्रह्मानन्द–रूपं ज्ञेयम्।

अतः क्षेत्रं मायाकल्पितं मिथ्यैव। परं क्षेत्रज्ञश्च परमार्थसत्यम् अधिष्ठानस्वरूपः। क्षेत्र–क्षेत्रज्ञयोः ज्ञानं मोक्षसाधनम्।

श्रीमन्मधुसूदनमतेन श्रीकृष्णतत्त्वमेव परमतत्त्वम्। श्रीहरिः वासुदेवश्च ब्रह्मरूपः। सोपाधिकस्य निरूपाधिके कल्पितत्वात् कल्पितस्याधिष्ठानानतिरेकात् सर्वकल्पनाधिष्ठानत्वेन भगवतः श्रीकृष्णस्य परमार्थसत्य–निरूपाधि–ब्रह्मरूपत्वं सिद्धमेव। तस्माच्छ्रीकृष्णभिन्नं पारमार्थिकं वस्तु नास्ति। अमृतस्वरूप–मोक्षस्तथा ज्ञाननिष्ठा–लक्षणो धर्मोऽपि श्रीहरौ पर्यवस्यति।

जीव–ब्रह्मैक्यं हि वेदान्तशास्त्र–प्रतिपाद्यम्। जीव–ब्रह्मैक्यं यत्र संख्यायते तत् सांख्यं वेदान्तशास्त्रमिति ‘संख्यायन्ते व्युत्पाद्यन्तेऽस्मिन्निति सांख्यम्’ इति व्युत्पत्त्या अवधार्यते। उक्तं च–

सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्। (श्री. म. गी.– १८/१३)

अत्राशङ्क्यते ‘कृतम्’–पदेन कर्म बोध्यते तर्हि आत्मतत्त्व–प्रतिपादके वेदान्तशास्त्रे कथं कर्मतत्त्वमालोचितम्। तत्रोच्यते, कर्मान्तस्तु तत्त्वज्ञानोत्पत्त्या शास्त्रे प्रोक्तान्येव। अनात्मधर्म कर्म अविद्यया अध्यारोप्यते परं शुद्धात्मज्ञानेन अविद्यानिवृत्त्या कर्मणोऽन्तो भवति। आत्मतत्त्वनिरूपणार्थम् आत्मनः कर्मासंबन्ध–प्रतिपादनार्थं च अनात्मभूतानि कर्मकारणानि उल्लिखितत्वाद् अद्वैततात्पर्यहानिर्न संभवेत्। ज्ञानस्य सर्वकर्मान्तत्व–प्रतिपादनाज् ज्ञानशास्त्रस्यापि कर्मान्तत्वमुपपद्यते।

अद्वैतवेदान्तिमधुसूदनसरस्वती धर्माचरणविषये वैष्णवमतादर्शी आसीत्। गौडीयवैष्णवमतेन जीवस्तु परमात्मनः अंशभूतः; परमात्मना सह जीवस्याभेदोऽत्र न स्वीक्रियते। परमेश्वरेण सह भक्तस्य सायुज्यं तत्राभिप्रेतम्, न तु ऐकात्म्यम्। वैष्णवमतेन सह मधुसूदनस्याद्वैतभावनायाः भिन्नत्वेऽपि मतद्वयस्य तुलनात्मिका चर्चा तथा गौडीयवैष्णवदर्शनस्वीकृतोऽचिन्त्यभेदाभेद–संबन्धोऽप्यत्र विचार्यः। *गूढार्थदीपिकायां* ज्ञानयोगविषये मधुसूदनसरस्वतीकृता व्याख्या पर्यालोचनप्रसङ्गे

माध्वमतपुष्टगौडीयवैष्णवमतेन साकमद्वैतवेदान्तदर्शनस्य प्रभेदा अत्र विचारणीया सैव मूलपत्रे उपस्थाप्यते।

# षष्ठोऽध्यायः

# उपसंहृतिः

भक्तिरहितशुष्कविचारात्मकं ज्ञानं न वेदान्तशास्त्रप्रतिपाद्यम्। भक्त्या ज्ञाननिष्ठया च परमात्मस्वरूपभूतम् अखण्डसत्य–ज्ञानानन्दरूपं श्रीभगवन्तं साक्षात्क्रियते। भक्तिज्ञानयोगयोः अपूर्वसमन्वयो गीतायां प्रतिष्ठितस्तदेव *गूढार्थदीपिका*यां प्रतिपादितः। परमतत्त्वस्य यथार्थज्ञानं भक्त्या एव संभवति। परमतत्त्वं प्रति शुद्धचित्तस्याकर्षणमेव भक्तिः। आकर्षणमिदं गम्भीराद् गम्भीरतरं भूत्वा चित्तलयं करोति। स्वस्वरूपे परमतत्त्वस्य स्थितिस्तदा भवति। सर्वकरणोपाधिसंयोगरहितया शुद्धरूपेण स्वप्रकाशतत्त्वं तदा स्फुरति। एतत्तु ज्ञानपदवाच्यम्। बुद्धिवृत्त्या तत्त्वविषयिणि आलोचनं वेदान्तप्रतिपाद्यज्ञानपदवाच्यमिति वक्तुं न शक्यते। निरावरणसुन्दरपरमतत्त्वस्य साक्षादपरोक्षानुभूतिरेव ज्ञानम्। इदं च त्रिगुणातीततत्त्वस्य निस्त्रैगुण्यरूपेणानुभवः। इयमनुभूतिः वेदान्तसंमतज्ञानमिति निश्चप्रचम्। रजोस्तमोमलासंस्पृष्टेन शुद्धसत्त्वगुणविशिष्टचित्तेन विशुद्धसत्त्वोपाधिसमन्वितस्य परमतत्त्वश्रीभगवतोऽनुभूतिरेव शुद्धा भक्तिः। भक्तिविवर्जितशुष्कविचारात्मकज्ञानं न वेदान्तशास्त्रप्रतिपाद्यमित्यलमतिविस्तरेणेति शम्।

# शब्दसंकेतः

गू. दी. – गूढार्थदीपिका

पा. धा. – पाणिनीय–धातुपाठः

यो. सू. – योगसूत्रम्

ना. सू. – नारदसूत्रम्

शा. सू. – शाण्डिल्यसूत्रम्

प. स. – परमसंहिता

भा. पु. – भागवतपुराणम्

श्री. भा. – श्रीभाष्यम्

ना. शा. – नाट्यशास्त्रम्

भ. र. – भक्तिरसायनम्

श्री. म. गी. – श्रीमद्भगवद्गीता

बृ. उ. – बृहदारण्यकोपनिषद्

श्वे. उ. – श्वेताश्वतरोपनिषद्

वि. चू. – विवेकचूडामणिः

[1] गीताध्यानम्– ४
[2] गू. दी., गीता, १८/६६
[3] पा. धा., १४४४
[4] पा. धा., ११७७
[5] यो. सू., १.२
[6] रा. भा., गीता, ४/१८
[7] गू. दी., उपक्रमणिका– १२
[8] गू. दी., गीता, ५/५
[9] गू. दी., गीता, २/३१

[10] गू. दी., गीता, २/२३
[11] ना. सू., २
[12] ना. सू., ५१
[13] शा. सू., २
[14] प. स., ४/७२
[15] भा. पु., ७/१/३१
[16] श्री. भा., १/१/१
[17] ना. शा., ६/३६
[18] गू. दी., गीता, ६/१४
[19] गू. दी., गीता, ७/२५
[20] गू. दी., गीता, १३/१

# ग्रन्थानां पञ्जिः


Bhattacharya, Asutosh. *Vedānadarśana – Advaitavāda; Vedāntacintāra Kramavikāśa*. (Vol.1). Calcutta (now Kolkata): University of Calcutta, 1961. (Bharatiya Darsana Granthamala).

Chatterjee, Chinmayi. *Bhaktiraser Vivartan*. Calcutta (now Kolkata): Sanskrit College, 1972. (Calcutta Sanskrit College Research Series No. LXXVII).

De, Sushil Kumar. *Early History of the Vaiṣṇava Faith and Movement in Bengal*. Calcutta (now Kolkata): General Printers and Publishers Limited, 1942.

Kar, Minati. *Advaita vedānte jñāna*. Calcutta (now Kolkata): Adityamoy,1998.

Madhusūdana-Sarasvatī. *Bhaktirasāyanam*. Ed. & Beng. Trans. by Durgacarana-samkhyavedantatirtha. Kolkata: Sanskrit Pustak Bhandar, 1404 BY.

Patañjali. *Yogasūtra.* Ed. Purna Chandra Sharma. *Patañjal Darshan*. With *Byāsabhāṣya* by Vedabyāsa. Kolkata: West Bengal State Book Board, 2005.

*Śrīmadbhagavadgītā*. Ed. Nalinikanta Brahma. With Sans. Comm. *Gūḍhārtha-dīpikā* of Madhusūdana-Sarasvatī & Beng. Trans. Bhutanatha –saptatirtha. Calcutta (now Kolkata): Krishna Brothers, 1345 BY.